Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 1 | ISSN : 2582-0095

# वेदविहितपञ्चमहायज्ञानां प्राशस्त्यं लोकोपकारकत्वं च

R.V. Satyanarayanacharyulu
Asst. Professor, VaikhanasaPourohitya, S.V. Vedic University, Tirupati, A.P.

**शोधप्रबन्धसारांश**:-पञ्चमहायज्ञैः मनुष्यः पूतो भवति। महायज्ञाः इति पदे यज्ञानां अतीवमहत्त्वं वर्तत इति ज्ञेयम्। ते यज्ञाः पञ्च देव–भूत–पित–ब्रह्म–मनुष्ययज्ञा इति। तान् यज्ञान् अहरहः कर्तव्यः। तेन आचन्द्रार्कं वंशाभिवृद्धिः, कीर्तिः,सत्सन्तानफलावाप्तिश्च प्राप्यत इति भगवता विखनसमुनिना उक्तम्।तथा च**यं यं काममधीते तेन तेन हास्यक्रतुनेष्टं भवतीति** उक्तम् आश्वलायमहर्षिणा। अतः वेदोदितकर्मानुष्ठाद्वारा आत्मनः उपकारं,लोकोपकारकं च भवति।

**कुञ्चिकपदानि-** पञ्चसूनाः, पशुबन्धः,नीवासश्रेष्टिः, स्वैरिणी, अग्न्याधानं, स्वाध्यायं, सर्पमेधः, वैश्वदेवः, ऋणत्रयम्, वैश्वदेवम्, परमपदम्।

---

प्राचीनतमभारतीयसाम्प्रदायस्य आर्षसंस्कृतेः च यज्ञः मूलाधारः।अनेकसहस्र–वर्षेभ्यः आरभ्य यज्ञक्रिया भारते अविरला प्रचलति। महर्षयः यज्ञं सर्वकर्मसु प्रधानं निश्चित्य सृष्ट्यां सर्वप्राणिकोट्याः समुद्दिष्टवः परमं पवित्रं सकलसम्पत्प्रदं यज्ञकर्म सर्वार्थसाधुकं मत्वा आर्यावर्तदेशे यज्ञस्य कर्मणां चक्रवर्तित्वा पदवीं आरोपयामासुः।

**यज्ञः कतिविधः**

**यज्ञाः नानारूपाः वेदेषु दृष्टाः अथर्ववेदे बहूनां यज्ञानां नामानि उदाहृतानि**[1]

**गोपथब्राह्मणे-**

अग्न्याधानं,पूर्णाहुतिः,अग्निहोत्रं,नीवासस्येष्टिः,चातुर्मास्यं,पशुबन्धः,अग्निष्टोमः,राजसूयः,वाजपेयः,अश्वमेधः,सर्पमेध इत्यादीनां यज्ञानां वर्णनं दृश्यते। एतेषु अश्वमेध,राजसूय,सर्पमेध आदयः विशेषयज्ञरूपेण परिगणिताः। छान्दोग्योपनिषदि अश्वपति नामकः राजा गृहागतान् आकणि प्रभृतीन् ऋषीन् एवमुक्तवान्। युष्माकम् अग्नीनां मे राज्यं पवित्रं स्थानं भवितुमर्हति अहमपि श्रेष्ठे केकुयवंशेजातः मम राज्ये चोराः कुत्सिताः क्षीबाः,अग्निहोत्ररहिताः स्वेच्छारिणः पुरुषाः व्यभिचारिण्यः स्त्रियः न वर्तन्ते। ऋत्विग्भ्यः अपि पर्याप्तं धनं दास्यामि इति।

**तान्होवाचाश्रवपतिवैभगवन्तोयं कैकेयः सम्पतीममात्मानं वैश्वानरमश्चेति तं हन्ताभ्यागच्छामेति तं हाभ्याजग्मुः। तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार स ह पर्तः सजिहानहवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति**[2]**।**

---

1.अ–वे–1–1–77,11–7–9,11–7–19

2.छा–उ–5–11–4,5 मन्त्राः 494पु

एतेन ज्ञायते यदग्निहोत्रं नित्यकर्मानुष्ठाने अङ्गरूपेण निरूढं आसीदिति।

**यज्ञशब्दार्थः**

**यज-देवपूजा सङ्गतिकरदानेषु (भ्वादि उभयपदि अनिट्) इति धातोः यजयाचयतविच्छप्रच्छरक्षोनङ्**[3]इति सूत्रेण नङ् प्रत्यये यज्ञः इति रूपम्। इज्यते यजते वा अनेन यजते अत्र वा इति यत्ज्ञः। यज्ञसाधनं यज्ञकर्म यज्ञदेशोपि यज्ञशब्देन व्यवरहारार्यः इति वैयाकरणमूर्धन्येः भानोजिदीक्षितैः अमरकोशे स्पष्टमुक्तम्।

यज्ञः सर्वोध्वरो यागः सप्ततन्तुर्मखः क्रतुः येति इज्यते[4] अनेन वा अत्र वा यजदेवपूजादौ (भ्वादि- उभयपदि- अनिट्) यजया च ---- इति नङ्[5]। यज्ञः स्यादात्मनि मखे नारायणहुताशयोः इति हैमः। यज्ञो वै विष्णुः इति श्रुतिः। यज्ञशब्दस्य दानं,देवानां पूजनं,वस्त्वन्तरेण योजनं इत्यादयः अपि अर्थाः प्रसिद्धाः। अग्नौ तान् तान् देवान् उद्दिश्य क्षीरादीनां हविषः रूपेण अर्पणं कृत्वा न मम इति भाव्यमानः मानसव्यापरारविशेषः एव धात्वर्थः। यज धातोः समानार्थकः अर्चपूजायां इति धातुरपि वेदेषु लोकिकवाङ्मये च दृष्टः। शतपथब्रह्मणे यज्ञो वै श्रेष्टतमं कर्म इति स्पष्टं वर्णितम्। सर्वकर्मसु यज्ञक्रिया उत्तमा इत्यर्थः। अथर्ववेदे यज्ञः भौगोलिकवातावरणस्य पावनत्वसिद्धये निरूढो भवतीति स्पष्टमुक्तम्[6]।

**यजुर्वेदे द्वितीयाध्याये यज्ञप्रयोजनमेवं विस्तरेण वर्णितम्।**

**संबर्हिरक्तायग्हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः**

**समिन्द्रो विश्वदेवेभिरग्क्तांदिव्यं नभो गच्छतु यत् स्वाहा**[7]

यज्ञे आहुतिरूपेण दत्ताः शुद्धघृतं,जलं प्रभृतयः पदार्थाः वायुना सूर्यकिरणैश्च मिलिताः आकाशेस्थितानां सर्वेषां पदार्थानां दिव्यत्वं सम्पादयन्ति। तेन प्रजानां आयुरारोग्यैश्वर्यसम्पत्तिः भवति इति मन्त्रार्थः। गीताचार्यः भवगवद्गीतासु यज्ञमाहत्म्यं विस्तरेण एवमुक्तवन्तः।

**अन्नाद्भवति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद्भवति पर्जन्यः यज्ञः कर्मसमुद्भवः**[8]।। इति

स्पष्टं व्यख्यातवन्तश्च यज्ञादेव मेघाः वर्षन्ति ततः सस्यक्षेत्राणि सस्यसम्पन्नानि भवन्ति। सस्येभ्यः सर्वैः जीविभिः अन्नं लभ्यते। अन्नादेव समस्तजीवराशीनां पोषणं भवति। एवं यज्ञादेव सर्वं विश्वं स्थिरं भवति इति भगवद्गीतानां तात्पर्यम्।

**देवान् भावयतानेन ते देवा भावयन्तु वः।**

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ**[9]।।

यज्ञमुखेन इन्द्रादिभ्यः हवींषि दत्वा सन्तुष्टेभ्यः तेभ्यः वर्षं प्राप्य वयमपि मोदामः इति गीतातात्पर्यम्

**यज्ञशिष्टाशिनः सन्तोमुच्यन्ते सर्वकिल्बिषैः**

**भुञ्जते ते त्वघं पापाः ये पचन्त्यात्मकारणात्**[10]

---

3.अ-अ-**3-3-90**

4.अ-को-2-7-13श्लो रामाश्रमी व्यख्या च 329 पु

5.अ-अ-3-3-90

6.19-55-3,4

7.यजुर्वेदः 2-22

8.भ-गी-2-14

9.भ-गी-3-11

10.भ-गी-3-13

यज्ञशेषस्य विघसः इति नाम विघसस्य भोक्ता पापेभ्यः मुक्तो भवति। अप्रदाय परस्मै यो भुङ्क्ते सः चोरः एव भवति इत्यपि गीतासु एव स्पष्टम्। विशेषतः देवेभ्यः अदत्त्वा स्वयं न भोज्यम्।

**इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः**

**तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः[11]॥**

**यज्ञाशिष्टामृतभुजः यान्ति ब्रह्मसनातनम्**

**यज्ञे शिष्टं यज्ञशिष्टं तदेव अमृतं यज्ञशिष्टामृतम्।**

तदृभुञ्जते यज्ञशिष्टामृतभुजः। यज्ञशेषस्य भोक्तारः इत्यर्थः। ब्रह्मन् शब्दः नपुंसकलिङ्गे परमात्मापर्यायः। तद्ब्रह्मसनातनं – आत्यन्तप्राचीनं यान्ति-प्राप्नुवन्ति इत्यर्थः।

एवं यज्ञविभूतिः तद्वैभवं यज्ञमाहात्म्यं च महर्षिभिः बहुधा प्रशस्तं यज्ञः भारतीय-संस्कृतेः आत्मा इति नातिशयोक्तिः। विग्रहरूपस्य धर्मस्य परमात्मनः रामस्य आदर्श-पुरुषोत्तमस्य जन्म यज्ञादेव सिद्धम्। अपि च प्रथमेवयसि यज्ञरक्षायै पित्रा नियुक्तः विश्वा-मित्रमनुसरन् राक्षसान् सुज्रहार। अश्वमेधेन अपि इष्ट्वा दिग्विजयं कृत्वा विश्वस्यादर्शोभूत्। तथैव युधिष्ठिरोपि राजसूयेन इष्टवान्। वाजश्रवाः नामकः सर्ववेदसं यज्ञं सर्वस्व दक्षिणाकं कृतवान् इति कठोपनिषदि दृष्टम्।

**उशन् ह वै वाजस्रवसः सर्ववेदसं ददौ[12]।**

अधुना पाश्चात्मा अपि यज्ञवैशिष्ट्यमभिज्ञाय वेदोक्तकार्याणि निरुह्य सफलीकृताः भवन्ति। अग्नौ हय्यंगवीनस्य हतनेन वातावरणे आटमिक् रेडियेषन् (अणुधार्मिकशक्त्या उत्पन्नं जननाशकं काषुष्यं) निवारितं भवतीति रष्या देशस्थैः वैज्ञानिकैः प्रस्तुतम्। प्राचीनाः अपि पर्यावरणशुद्धये सर्वोपि नित्यं दीक्षिताः श्रद्धया द्विसन्ध्यं अग्निहोत्रं हुतवन्तःअस्माभिः अग्निहोत्रपरिचर्या मोक्षाय अनूचानाचाररक्षणाय च कृता। पाश्चात्याः कालुष्यवारणार्थं अमोघास्त्रं मत्वा विनियुज्यते। अमेरिकादेशे कुत्रचित् स्थले 9-9-1978 तिथेः आरभ्य रात्रिं दिवं अद्यापि यज्ञः प्रवर्तते। अमेरिका अध्यक्षनिवासान् यज्ञभूमिः षष्ठिनिमेषदूरे(1hour) वर्तते। पश्चिमजर्मनि देशे अग्निहोत्रात् लभ्यं भस्म औषधसम्पादने दीर्घव्याधिचिकित्सायां च उपयुक्तं वर्तते।

**याज्ञिकसामाजिकं प्रयोजनम्**

एवं प्रपञ्चे प्रायशः सर्वे देशाः अग्निहोत्राभिमुखं श्रद्धधानाः भवन्ति। अग्निहोत्रात् सस्यसमृद्धिरपि साध्या इति परिशोधकाः अभिप्रयन्ति। एवं आध्यात्मिकेप्रयोजनेन समं यज्ञस्य भौतिकं प्रयोजनमपि सम्पन्नम्। हैन्दवैः आचरिताः यज्ञक्रियाः विशेषतः सार्वभौमाः विश्वजनश्लाघ्याः वर्तन्ते।

सर्वेषु धर्मेषु (मतेषु) येनकेनापि रूपेण यज्ञः आदृतः इति माक्स्मोल्लर् महायशाः फिजिकल् रिलीजियन् इति ग्रन्थे उदाहृताः। प्रपञ्चे सनातनार्षसम्प्रदायानां रिक्थभाजः भारतीयाः यज्ञसंस्कृत्याः एकायनाः बभूवुः इति वक्तुमेतदुदाहरणम्।

**पञ्चमहायज्ञाः**

मानवः जातमात्र एव त्रिभिः ऋणैः जायते। ऋणेभ्यः विमुक्तः एव मोक्षं प्राप्नोति। 1.देवऋणम्2.ऋषिऋणम्3.पितृऋणम् इति त्रीणि ऋणानि। देवऋणानि अपाकर्तुं यज्ञाः करणीयाः। समस्तपापेभ्यः मुक्तये यज्ञाः साधनानि इति ब्रह्मा स्वयमुक्तवान्। यज्ञाः वेदैः एवं निरुक्ताः।

**यज्ञो वै विष्णुः यज्ञ एवान् ततः प्रतितिष्ठति। सोत्र जुहोति विष्णवे स्वाहा यज्ञाय स्वाहा। पुरुषसूक्तेऽपि यज्ञान् सर्वाणि द्रव्याणि जातानि इति स्पष्टम्।तस्माद्यज्ञात्सर्वहुतः ऋचस्सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्मात्....। अग्निमण्डलगतं जनार्दनम् अग्निमुखेन हविर्भिः आराधनं होमपूजा इत्युच्यते।**

---

[11].भ-गी-3-12

[12].क-उ-1-1-1

**ध्यात्वा यथोक्तहविषा[13] यजेत्तद्धोमपूजनम्**

**भगवद्गीतासु भगवान् श्रीकृष्णः यज्ञानां जपयज्ञोस्मि इति स्पष्टमुक्तवान्**

भगवान् यज्ञैः प्रीयते ततः भगवद्प्रीतिकरान् पञ्चमहायज्ञान् यावज्जीवं प्रत्यहम् अनुतिष्ठेत् इति वेदाः निर्दिशन्ति। वेदादेशानुयायिनः महर्षयोपि गृह्यसूत्रेषु (कल्पसूत्रेषु) पञ्चमहायज्ञान् निर्दिष्टवन्तः। वैखानसमहामुनिः औखेयससूत्रे

**ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञश्चेति पञ्चानाम् अहरहरनुष्ठानम्[14]।**

**पञ्च वा एते महायज्ञाः सतति (सततं) व्रतायन्ते सतति सन्तिष्ठन्ते। देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ** इति।

गृहस्थाश्रमे स्थितः पञ्चसूनाभिः हिंसादोषं प्राप्नोति। मेधी इति हिंसार्थकः गृहेन मेधी-गृहमेधी। तान् हिंसादोषान् अपाकर्तुं पञ्चमहायज्ञाः करणीयाः इति मनुना स्पष्टमुक्तम्। पञ्चमहायज्ञानां स्वरूपमपि निरूपितम्।

**पञ्चसूना गृहस्थस्य चुल्ली पेषण्यवस्करः।**
**कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।**
**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।**
**पञ्चक्लुप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्।**
**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनम्[15]।।**
**पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।**
**सगृहेऽपि वसन्नित्यं सूनदोषैर्न लिप्यते।**

**ब्रह्मयज्ञः**

परमात्मनः प्रीतये ब्राह्मीमुहुर्ते उत्थितः हरिस्मरणपूर्वकं वेदोक्तशौचाचारान् निरूह्य सङ्कल्पसूक्तोक्तप्रकारेण समन्त्रकम् अघवर्षणस्नानं कृत्वा स्नानाङ्गतर्पणानि दत्वा पुण्ड्रधारणानन्तरं सूर्योपस्थानमुक्त्वा देव-ऋषि-पितृतर्पणानि विधाय ब्रह्ममेधासम्पत्तये स्वार्चितशाखायाः वेदवेदाङ्गानि नित्यम् एखदेशमात्रमपि मननं कुर्यात्- स एव ब्रह्मयज्ञः

**देवयज्ञः**

प्राणिनां जीवनार्थं देवाः वृष्टिं ददति। वर्षेण सस्यवृद्ध्या सर्वेप्राणिनः जीवन्ति। कृषिक्षेत्राणि सस्यश्यामलानि भवन्ति। वर्षेण विना भूमिः न फलति।

**पर्जन्यादन्नसम्भवः, पर्जन्याय प्रगायत अन्नाद्भूतानि जायन्ते जातान्यन्नेन वर्धन्ते।**

**अद्यतेत्ति च भूतानि तस्मादन्नं तदुच्यते** इति

**तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अन्नं न परिचक्षीत तद्व्रतम्[16] अकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योन्नम्। अन्नात्पुरुषः।**

सर्वेषां प्राणिनां पर्जन्यादेव आहारः लभ्यो भवति। अन्नात् प्राणिनः जायन्ते **आहारमूलाः धातवो भवन्ति**[17] अन्नात् प्राणिनः जायन्ते जातानि अन्नेन जीवन्ति। अन्नं न निन्द्यात्। एतद्व्रतम्। परब्रह्मस्वरूपकस्य अन्नस्य लाभः देवभ्यः भवतीति

---

13.वै-क्रि-1,12ऊ

14.श्री-वै-क-सू-1-1-1-4

15.म-स्मृ-3-68तः71

16.तै-उ-03

देवऋणमपाकर्तुं देवप्रीतये नित्यः नैमित्तिकश्चेति यज्ञः कर्तव्यः। देवानामाज्यम् आहारः तदाज्यं समन्त्रकम् अग्नौ जुहुयात्। अग्निमुखेन देवाः आज्यमाहारं स्वीकुर्वन्ति। देवेषु विष्णुः ज्येष्ठः अग्निः कनिष्ठः एतयोः मध्ये सर्वे देवाः तिष्ठन्ति। सर्वेदेवेभ्यः हविः अग्निमुखेन समर्पितं भवति। अन्नादिकं भगवते निवेद्य देवऋणमपाकुर्यात्। अत्र श्रुतिः

**अग्निमुखा वै देवाः अग्निर्वै देवानामवमः।**

**विष्णुः परमः तदन्तरेण सर्वा अन्या देवताः** इति ब्राह्मणम्।

वैश्वदेवकाले प्राप्त्यतिथिं शक्त्या तर्पयेत् वैश्वानरो ह्येष भवति[18]।

**पितृयज्ञः**

मातापित्रोः ऋणस्य अपाकरणं सर्वथा सर्वैः न साध्यम्। पितृऋणापनयनाय पितृयज्ञः करणीयः। **मातृदेवो भव पितृदेवो भव, आचार्यदेवो भव ---- इत्युपनिषत् अनुशासनम्।**

माता देवो यस्य मातृदेवः। पितरौ देववत् पूजनीयौ इत्युपनिषदभिप्रायः। पितरः वंशाभिवृद्धिम् इच्छन्ति पितृऋणापनयनाय गृहस्थाश्रमं स्वीकृत्य सन्ततिः उत्पादनीया। सन्तानप्राप्तेः अनन्तरमेव पितृऋणात् मुक्तो भवति। जीवतोः सेवनं मरणानन्तरं पारलौकिक्रियाकरणम् अमावास्या सङ्क्रमणादिषु पितृतर्पणकरणेन पितृऋणात् मुक्तो भवति।

**भूतयज्ञः**

भूताः प्राणिनः एव बलिः भूतानां पूजनम्। सुर-ऋषि-मनुष्याणां बलं यस्मात् प्रवर्धते तस्मात् बलिः इति बलिशब्दार्थः। भूतेभ्यः आहारादिप्रदानेन पशुपक्ष्यादीनां तृप्तिः भवति स एव भूतयज्ञः।

**मनुष्ययज्ञः**

मनोरपत्यानि मनुष्याः ज्ञानसम्पन्नाः इत्यर्थः अतिथये ब्रह्मस्वरूपमन्नं देयं केवलभोजनप्रदाने वर्णाश्रमादिविवक्षा न करणीय भोजनकाले आगतं यथाशक्त्युपचारैः अर्चयित्वा मिष्टमन्नं तस्मै देयम्। एवं मनुष्यः शाश्वतपुनरावृत्तिरहितपरमपदसाम्राज्यप्राप्तये पञ्चमहायज्ञान् अनुतिष्ठेत्।

**दया सत्यशौचाचारसम्पन्नः वेदाध्ययनतत्परः अध्यापकश्च भूत्वा श्राद्धक्रियाभिः अपत्योत्पदानेन च पितृन् तोषयित्वा बलिहरणेन भूतानि तर्पयित्वा आतिथ्येन अन्नदानेन ऋणत्रयविमुक्तो भवति। ऋणरहितः जीवः नित्यमुक्तः परमपदं श्रीमन्नारायणं प्राप्नोति।**

दया सत्यशौचाचारयुतस्स्वाध्यायतर्पणाभ्याम् ऋषीन् यज्ञबलिहोमजलपुष्पाद्यैः देवान् श्राद्धैः पुत्रैश्च पितृन् बलिना भूतान् अन्नाद्यैः मनुष्यांश्च नित्यमर्चयेत्।

**ऋणत्रयैः मुक्तो अनृणो भवति[19]।**

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।**

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्मोक्षरसमुद्भवम्।**

**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्[20]।।**

**अग्नयश्च स्वाध्यायप्रवचने च**

---

17.वै-क-सू-3-9-91

18.वै-क-सू-3-7,72

19.श्री-वै-क-सू-8-4-35,36

20.भ-गी-3-14,15

**अग्निहोत्रं च स्वाध्यायप्रवचने च**[21]

एवं रीत्या यो मनुष्यः पञ्चमहायज्ञान् प्रतिनित्यं करोति, सः इहलोके कीर्तिं,सुखसन्तोषादिकं,पुत्रपौत्रादिकञ्च प्राप्य, परलोके अनुत्तमसुखं प्राप्नोतीति ज्ञेयम्। तदुच्यते आश्वलायनेन **यं यं काममधीते तेन तेन हास्यक्रतुनेष्टं भवतीति** उक्तम्। अतः वेदोदितकर्मानुष्ठानं प्रतिनित्यं कर्तव्यम्।

## उपयुक्तग्रन्थानां सूची

| Sl no | सङ्केताक्षरसूची | ग्रन्थनाम | चिरुनामा | ग्रन्थकर्ता | वर्षः |
|---|---|---|---|---|---|
| 01. | श्री-वै-गृ-सू | श्रीवैखानसगृह्यसूत्रम् (वाजपेयभाष्यम्) | तिरुमल तिरुपति देवस्थानम्, तिरुपति | श्रीमान् रोम्पिचर्ल पार्थसारथिभट्टाचार्यः | 1997. |
| | | | Svvutirupati | डा. यम्.सीतारामशास्त्रि | 2012 |
| 02. | म.स्मृ | मनुस्मृतिः | नवलकिशोरविद्यालय गोमती तट | पण्डितगिरिजाप्रसादद्विवेदी | 1917 |
| 03. | छा-उ- | छान्दोग्योपनिषत् | पारशरीयमुद्राक्षरशाला श्रीवासाश्रमम्, एर्पेडु | इङ्गुवपट्टाभिरामशास्त्रि | 2001 |
| 04. | अ.अ | अष्टाध्यायीसूत्रपाठः | बालमनोरमामुद्रणालयः, मद्रास् | शंकररामशास्त्रि | 1937 |
| 05. | अ-को | अमरकोशः | कोण्डाशङ्करय्य महाकालिवीथि, भाग्यनगरम् | कोण्डाशङ्करय्य | 1949 |
| 06. | तै-उ | तैत्तिरीयोपनिषत् | कोत्तबेल्गाम् पार्वतीपुरम् | श्रीराममूर्तिः आर्यसोमयाजुलवेङ्कटजगन्नाथराव् | 2017 |
| 07. | भ-गी | भगवद्गीता | वारणाशी | कृष्णतनुजनुषा | 1867 |
| 08 | क-उ | कठोपनिषत् | संस्कृतसंशोधनसंसत्, यादवाद्रिः | डा.यन्.यम्. अनन्तरङ्गाचार्यः | 2009 |
| 09. | वै-क्रि-अ | वैखानसक्रियाधिकारः | तिरुमल तिरुपति देवस्थानम्, तिरुपति | श्रीमान् रोम्पिचर्ल पार्थसारथिभट्टाचार्यः | 1997. |
| 10. | आश्व-गृ-सू | आश्वलायनगृह्यसूत्रम् | चौखाम्बा | वासुदेवशर्मा | 1867 |

21.तै-उ-1-8